One Year PG in

Phalita Jyotisha

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः - फलितज्यौतिषम्

2025

ज्ञान-विज्ञान विमुक्तये
UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

Curriculum Development Committee for One Year PG (Phalita Jyotisha)

Prof. Deviprasad Tripathi

Chairman of the Sub-Committee and Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi ✉ devi@slbsrsv.ac.in

Dr. UmaShankar

Asst. Professor, Department of Sanskrit, University of Delhi

✉ umashankarkaswan@gmail.com

Dr. Deshbandhu

Asst. Professor, Department of Vastu-Shastra National Sanskrit, New Delhi

✉ deshastro.vastu@gmail.com

Dr. Dinakar Marathe

Convenor of the Sub-Committee and Assoc. Professor, Department of Jyotish, Kavikulguru Kalidas Sanskrit University, Ratnagiri Campus, Ratnagiri, Maharashtra - 415612

✉ dinakarmarathe@gmail.com

विषयसूची

कार्यक्रमस्य परिचयः

(Introduction of the Program)

आचार्यः फलितज्यौतिषम् (M.A. in Phalita Jyotisha) इत्याख्यः पाठ्यक्रमः एकवर्षात्मकः कार्यक्रमः वर्तते । कार्यक्रमेऽस्मिन् आहत्य द्वे सत्रे भवतः । छात्राः फलितज्यौतिषस्य शास्त्रिस्तरे जातक-मुहूर्त -प्रश्न -संहितादिविषयाणां परिचयात्मकं व्यावहारिकं च अध्ययनं कृत्वा सम्प्रति आचार्यस्तरे तेषां ग्रन्थानां विस्तरेण प्रयोगात्मकम् अध्ययनं कर्तुं प्रवर्तन्ते । अतः सम्पूर्णस्य फलितज्यौतिषपाठ्यक्रमस्य अध्ययनेन छात्राः शास्त्रीयमूलग्रन्थानामध्ययनपुरस्सरम् अनुप्रयोगस्य ज्ञानं प्राप्नुवन्तीति कार्यक्रमस्य वैशिष्ट्यं वर्तते।

अर्हता - शास्त्रीकक्ष्यायाम् तत्समकक्ष्यापरीक्षायां N.T.A. द्वारा सञ्चाल्यमानार्हतापरीक्षायां वा उत्तीर्णाः छात्राः कार्यक्रमेऽस्मिन् प्रवेष्टुमर्हन्ति। अत्र सत्रद्वये आहत्य -

- प्रधानपाठ्यक्रमाः (Major Course) 8 पाठ्यक्रमाः (Courses/Papers)
- चितस्वशास्त्रविषयकपाठ्यक्रमाः (DSE) 7 पाठ्यक्रमाः (Courses/Papers)

कार्यक्रमस्य उद्देश्यानि

(Program Objectives)

1. भारतीयपरम्पराधारेण फलज्यौतिषशास्त्रस्य अध्ययनम् ।
2. प्राचीनभारतीयैः उपज्ञातस्य होराशास्त्रस्य (Astrology) प्रयोगात्मकम् अध्ययनम् ।
3. सनातनभारतीयमुहूर्तशास्त्रस्य व्यावहारिकतायाः वैज्ञानिकतायाः च प्रपञ्चनम् ।
4. भारतीयज्ञानपरम्परादृष्ट्या जातक-प्रश्न-संहिता-ताजिक-मुहूर्तादिविषयाणाम् अध्ययनम् ।
5. भारतीयजीवनपद्धतौ ज्योतिषशास्त्रस्य प्रयोगविषये मार्गदर्शनम्।
6. ग्रह-राशि-नक्षत्र-आयुर्दाय-राजयोग-विवाहानुकूल्य-शुभाशुभकाल-दशानिर्णयादीनाम् अध्ययनम्।
7. NET/SET इत्यादिस्पर्धात्मकपरीक्षासु अर्हतासम्पादनम् ।
8. शास्त्रवाक्यार्थादिपाठ्येतरगतिविधिभ्यः शास्त्रे नैपुण्यस्य, विश्लेशणात्मकाध्ययनेन शोधकर्मणि विशेषार्हतायाः च प्राप्तिः ।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

अस्य कार्यक्रमस्य अध्ययनादनन्तरं छात्राः -

- फलदीपिका-पराशरहोराशास्त्र-मानसागरीत्यादिहोराग्रन्थेषु निहितं फलादेशोपयुक्तं तत्त्वं सम्यक् ज्ञातुं समर्थाः भविष्यन्ति।
- अद्भुतसागर-बृहत्संहितेत्यादिग्रन्थेषु प्रतिपादितान् वैज्ञानिकविचारान् विवेचयितुं कुशलाः भूत्वा तद्विषये समाजे अन्यान् अवबोधयितुं सामर्थ्यं प्राप्स्यन्ति।
- ज्योतिषशास्त्रस्य आधुनिकपद्धतिभिः सह अन्तःशाखीयं चिन्तनं कर्तुं सक्षमाः भविष्यन्ति।
- होराशास्त्रस्य शास्त्रीयाध्ययनपुरस्सरं प्रयोगे नवाचारान् प्रस्तोतुं सामर्थ्यं प्राप्स्यन्ति।
- शास्त्रार्थसंवादे, शोधनलेखने, व्याख्याने च तर्कयुक्ततया प्रस्तुतीकरणाय दक्षाः भविष्यन्ति।
- कालमाधवादिग्रन्थानाम् अध्ययनपुरस्सरं तिथिनिर्णयादिविषये शास्त्रोक्तसमाधानं प्रदातुं सक्षमाः भविष्यन्ति
- पञ्चाङ्गस्य व्यावहारिकप्रयोगः, संस्कारेषु मुहुर्तनिर्णयः, मेलापकविचारः, इत्यादीनां ज्ञानं प्राप्य ज्योतिषस्य व्यावहारिकपक्षे सामर्थ्यं प्राप्नुवन्ति।
- प्राचीनैः मुनिभिः जातक-प्रश्न-मुहुर्तादिग्रन्थेषु प्रतिपादितं फलकथनक्रमम् अधीत्य समाजे मार्गदर्शनं कर्तुं छात्राः समर्थाः भविष्यन्ति।

कार्यक्रमस्य वैशिष्ट्यम्

(Graduate Attributes of the Program)

अयं फलितज्यौतिषस्य आचार्यकार्यक्रमः छात्रेषु संस्कृतभाषासंवर्धनं, शास्त्रानुरागम्, अनुसन्धानदक्षतां, प्रयोगकौशलं, वैज्ञानिकदृष्टिं च विस्तारयितुं साहाय्यं करोति, तद्द्वारा भारतस्य प्राचीनपरम्परायाः स्रोतसः वैशिष्ट्यं समग्रे विश्वे द्योतयितुम् उपकरोति।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीय मूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदान क्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
ग्रहभावफलदीपिका	✓	✓	✓	✓	✓	✓	✓
अद्भुतसागरः	✓	✓	✓	✓	✓	✓	✓
ताजिकसंज्ञातन्त्रम्	✓	✓	✓	✓	✓	✓	✓
मुहूर्तविज्ञानम्	✓	✓	✓	✓	✓	✓	✓
दशान्तर्दशाविचारः	✓	✓	✓	✓	✓	✓	✓
कालमाधवः	✓	✓	✓	✓	✓	✓	✓
ताजिकवर्षतन्त्रम्	✓	✓	✓	✓	✓	✓	✓
सामुद्रिकरहस्यम्	✓	✓	✓	✓	✓	✓	✓

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR DSE COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
भावकुतूहलम्	✓	✓	✓	✓	✓	✓	✓
नारदीयसंहिता	✓	✓	✓	✓	✓	✓	✓
जातकादेशः	✓	✓	✓	✓	✓	✓	✓
मानसागरी	✓	✓	✓	✓	✓	✓	✓
सर्वार्थचिन्तामणिः	✓	✓	✓	✓	✓	✓	✓
दैवज्ञवल्लभा	✓	✓	✓	✓	✓	✓	✓
जातकतत्त्वम्	✓	✓	✓	✓	✓	✓	✓
सारावली	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः पाठ्यक्रमः 1: ग्रहभावफलदीपिका	4	600-699
2		प्रधानः पाठ्यक्रमः 2: अद्भुतसागरः	4	600-699
3		प्रधानः पाठ्यक्रमः 3: ताजिकसंज्ञातन्त्रम्	4	600-699
4		प्रधानः पाठ्यक्रमः 4: मुहूर्तविज्ञानम्	4	600-699
5	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः पाठ्यक्रमः 5: दशान्तर्दशाविचारः	4	600-699
6		प्रधानः पाठ्यक्रमः 6: कालमाधवः	4	600-699
7		प्रधानः पाठ्यक्रमः 7: ताजिकवर्षतन्त्रम्	4	600-699
8		प्रधानः पाठ्यक्रमः 8: सामुद्रिकरहस्यम्	4	600-699

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य चितस्वशास्त्रविषयक -पाठ्यकमाः	चितस्वशास्त्रविषयः 1: भावकुतूहलम्	4	600-699
2		चितस्वशास्त्रविषयः 2: नारदीयसंहिता	4	600-699
3		चितस्वशास्त्रविषयः 3: जातकादेशः	4	600-699
4		चितस्वशास्त्रविषयः 4: मानसागरी	4	600-699
5	द्वितीयसत्रार्द्धस्य चितस्वशास्त्रविषयक -पाठ्यकमाः	चितस्वशास्त्रविषयः 5: सर्वार्थचिन्तामणिः	4	600-699
6		चितस्वशास्त्रविषयः 6: दैवज्ञवल्लभा	4	600-699
7		चितस्वशास्त्रविषयः 7: जातकतत्त्वम्	4	600-699
8		चितस्वशास्त्रविषयः (DSE) 2.क.4: सारावली	4	600-699

प्रधानपाठ्यक्रमाः

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: ग्रहभावफलदीपिका

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भावफलसिद्धान्तानाम् अधिगमनम्।
2. मान्दियुक्तसूर्यादिग्रहाणां फलज्ञानम्।
3. जातकफलनिर्णये आवश्यकस्य ग्रहदशाफलविचारस्य योगविचारस्य च अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भावचिन्तनपुरस्सरं फलादेशं कर्तुं शक्ष्यन्ति।
2. ग्रहदशाविचारस्य अध्ययनेन फलनिर्णयक्षमतां प्राप्स्यन्ति।
3. मान्दिफलविचारं ग्रहाणां गोचरफलविचारं च वक्तुं शक्ष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	ग्रहभावफलदीपिका	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भावफलसिद्धान्ताः। **श्रेयोऽङ्कः १**

- मृत्युकारणानि। मेषादिद्वादशराशिजन्यदोषाः।
- ऊर्ध्वाधः गतिः।
- भावफलसिद्धान्ताः।
- भावनाशकग्रहाः।
- द्वयोः भावयोः स्वामिफलविचारः।
- सन्धिगतग्रहफलम्।
- भावबाधकग्रहाः।
- ग्रहाणां पारस्परिकसम्बन्धः।
- तन्वादिद्वादशभावचिन्तनविचारः।

अन्वितिः २. दशाफलविचारः। **श्रेयोऽङ्कः १**

- सूर्यादिमहादशाफलम्।
- लग्नेशादिभावेशानां दशाफलम्।
- लग्नेशादिद्वादशभावेशानां नेष्टदशाफलम्।
- वर्गोत्तमांशस्थग्रहदशा।
- राज्यप्रददशाः।
- स्वोच्चादिस्थितग्रहफलम्।
- शुभाशुभदशाफलम्।
- अनिष्टकारकदशाफलम्।

- शुभदशाफल-परिपाककालः।

अन्वितिः ३. मान्दिफलविचारः। **श्रेयोऽङ्कः १**

- पापदशा।
- पापफलदशा।
- आरोहाऽवरोहादिदशा।
- मिश्रफलदशा।
- मृत्युप्रददशा।
- सङ्क्रमणफलम्।
- द्विर्द्वादशग्रहाणां महादशायां प्रत्यन्तर्दशाफलम्।
- अष्टकवर्गे विशेषविचारः। फलाप्तिकालज्ञानञ्च।
- शुक्राष्टकवर्गेण सन्ततिविचारः।
- शन्यष्टकवर्गेण मृत्युविचारः।
- लग्नादिद्वादशभावस्थमान्दिफलम्।
- गुलिकयुक्तसूर्यादिग्रहफलम्।

अन्वितिः ४. ग्रहाणां गोचरफलविचारः। **श्रेयोऽङ्कः १**

- गोचरे सूर्यादिग्रहाणां शुभस्थानानि वेधस्थानानि च।
- लग्नादिद्वादशभावेषु गोचरवशात् सूर्यादिग्रहफलम्।
- ग्रहाणां गोचरफलं प्राप्तिकालश्च।
- नक्षत्रगोचरविचारः।
- सूर्यादिग्रहाणां नक्षत्रन्यासक्रमः।
- लत्तादोषः लत्ताफलञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. गोपेश कुमार ओझा, (2008), *मन्त्रेश्वरकृता फलदीपिका,* वाराणसी : मोतीलालबनारसीदास।
2. डॉ. हरिवंश पाठकः, (2018), *फलदीपिका (हिन्दीव्याख्यासहिता),* वाराणसी : चौखम्बासुरभातीप्रकाशनम्।
3. डॉ. सुरेश चन्द्र मिश्र, (2022), *फलदीपिका (विद्याधरी हिन्दीव्याख्यासहिता),* नई दिल्ली : रंजन प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. वैद्यनाथः, (1984), *जातकपारिजातः*, वाराणसी : चौखम्बासंस्कृतसंस्थानप्रकाशनम्।
2. वराहमिहिरः, (2007), *बृहज्जातकम् (भट्टोत्पलटीकासहिता),* वाराणसी : चौखम्बासुरभातीप्रकाशनम्।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: अद्भुतसागरः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अद्भुतसागरस्याध्ययनपुरस्सरं संहितास्कन्धे ज्ञानसम्पादनम् ।
2. ग्रहणविषये संहितादृष्ट्या विशेषज्ञानसम्पादनम्।
3. पञ्चसंवत्सरविषये कार्तिकादिद्वादशवर्षविषये ज्ञानसम्पादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ग्रहणान्तर्गतं दशग्रासमोक्षविषयकं वर्णनं करिष्यन्ति।
2. सूर्याद्भुतावर्तान्तर्गतस्य लाङ्गलविचारं मङ्गलाद्भुतावर्तान्तर्गतस्य पञ्चमुखविचारं च निरूपयिष्यन्ति।
3. ग्रहयुद्धसङ्कल्पनाम् अवगन्तुं शक्ष्यन्ति।
4. प्रभवादिसंवत्सराणां गणनाविषये प्रतिपादयिष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	अद्भुतसागरः	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. रविराहुचन्द्राद्भुतावर्तविचारः। **श्रेयोऽङ्कः १**

- सूर्याद्भुतावर्त्तः -
  - शुभाशुभादित्यलक्षणम्।
  - अयन-ऋतुक्रमः।
  - सूर्यवर्णफलम्।
  - तामसकीलकाः।
- चन्द्राद्भुतावर्त्तः -
  - शुभाशुभचन्द्रलक्षणम्।
  - चन्द्रवर्णफलम्।
  - चन्द्रश्रृङ्गम्।
  - लाङ्गलविचारः।
- राहोरद्भुतावर्तः -
  - ग्रहणनिमित्तानि।
  - शुभाशुभराहुलक्षणम्।
  - सप्तपर्वविचारः।
  - सूर्यचन्द्रयोः ग्रहणमासफलम्।
  - सूर्यचन्द्रग्रहणराशिफलम्।
  - सूर्यचन्द्रग्रहणनक्षत्रफलम्।
  - दिक्फलम्।
  - दशग्रास-मोक्षविचारः।

अन्वितिः २. कुजबुधगुर्वद्भुतावर्तविचारः। **श्रेयोऽङ्कः १**

- मङ्गलाद्भुतावर्त्तः -
    - शुभाशुभमङ्गल-लक्षणम्।
    - नक्षत्रविशेषे चारफलम्।
    - मङ्गलपञ्चमुखफलम्।
    - वक्रमङ्गलफलम्।
- बुधाद्भुतावर्तः -
    - शुभाशुभबुधलक्षणम्।
    - नक्षत्रविशेषे चारफलम्।
    - नक्षत्रविशेषे प्राकृतादिगतिफलम्।
    - बुधोदयफलम्।
- बृहस्पत्यद्भुतावर्तः -
    - शुभाशुभबृहस्पतिलक्षणम्।
    - वर्णफलम्।
    - नक्षत्रफलम्।
    - कार्तिकादिद्वादशवर्षफलानि।
    - १२ युगानि।
    - पञ्चसंवत्सरविचारः।
    - प्रभवादिसंवत्सराः।

अन्वितिः ३. शुक्रशनिकेत्वद्भुतावर्तविचारः। **श्रेयोऽङ्कः १**

- भार्गवाद्भुतावर्तः -
    - शुभाशुभशुक्रलक्षणम्।
    - नक्षत्रगतफलम्।
    - वीथी-फलम्।
    - मण्डलफलम्।
- शनैश्चराद्भुतावर्तः -
    - शुभाशुभशनिलक्षणम्।
    - नक्षत्रचारफलम्।
    - शनिमार्गफलम्।
    - शनिवक्रफलम्।
- केत्वद्भुतावर्तः -
    - शुभाशुभकेतुलक्षणम्।
    - आकृतिफलम्।
    - केतोः प्रकाराः फलं च।

अन्वितिः ४. ग्रहयुद्धाद्भुतावर्तविचारः। **श्रेयोऽङ्कः १**

- ग्रहयुद्धाद्भुतावर्तः -
    - ग्रहयुद्धपरिचयः।
    - पराजितजयलक्षणयुक्तो ग्रहः।
    - रव्यादिग्रहाणां पराजयफलानि।
    - आक्रन्दादिलक्षणम्।
- आकृत्यदियोगाद्भुतावर्तः -
    - संवर्तादियोगफलानि।
    - रव्यादिवर्षाद्भुतावर्तः।
    - ग्रहाणां वर्षेशफलानि।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. निःशङ्करश्रीमद्बल्लालसेनदेवः, (१९०५), *अद्भुतसागरः*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
2. डॉ. शिवकान्तझा, (2006), श्रीमद्बलालसेनदेवप्रणीतः, *अद्भुतसागरः*, वाराणसी : चौखम्बाप्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. रामकृष्णभट्टः, एम्., (1996), *वराहमिहिरकृता बृहत्संहिता*, नई दिल्ली : मोतिलालबनारसीदासप्रकाशनम्।
2. अच्युतानन्दझाः, (2014), *वराहमिहिरकृता बृहत्संहिता*, वाराणसी : चौखम्बाविद्याभवनम्।
3. मिश्रः, डॉ. सुरेशचन्द्र, (2022), *वराहमिहिरकृता बृहत्संहिता*, रञ्जनप्रकाशनम्।
4. सुरकान्तझाः, *वराहमिहिरकृता बृहत्संहिता*, वाराणसी : चौखम्बाकृष्णदासअकादमी।
5. अय्यर्, एन्. चिदम्बरम्, *वराहमिहिरकृता बृहत्संहिता*, नईदिल्ली: परिमलप्रकाशनम्।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: ताजिकसंज्ञातन्त्रम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ताजिकशास्त्रस्य सिद्धान्तानां सम्यगवगमनम्।
2. वर्षकुण्डली-मुन्था-सहम-षोडशयोग इत्यादीनां जातिकपद्धत्याः प्रमुखतत्वानां ताजिकपद्धत्या विश्लेषणम्।
3. वार्षिकफलनिर्णयस्य (वर्षफलस्य) सिद्धान्तानां प्रयोगात्मकं ज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वर्षकुण्डली-मुन्था-सहम-षोडशयोग इत्यादीनां विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
2. ताजिकशास्त्रस्य मूलतत्वानां विश्लेषणं कर्तुं शक्ष्यन्ति।
3. वार्षिकफलनिर्णयस्य सिद्धान्तानां प्रयोगात्मकं निरूपणं करिष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	ताजिकसंज्ञातन्त्रम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. राशिस्वरूपं भावविचारश्च। **श्रेयोऽङ्कः १**

- राशिस्वरूपम्।
- मित्रामित्रनिरूपणम्।
- वर्षारम्भसमयसाधनम्।
- तिथिसाधनम्।
- ग्रहस्पष्टीकरणम्।
- चन्द्रस्पष्टविधिः।
- द्वादशभावसाधनम्।
- लग्नसाधनम्।
- दशमलग्नसाधनम्।
- भावस्थग्रहफलम्।
- भावविंशोपकविचारः।

अन्वितिः २. वर्गविचारः बलसाधनञ्च। **श्रेयोऽङ्कः १**

- राशीशद्रेष्काणेशविचारः।
- द्रेष्काणचक्रम्।
- ग्रहाणामुच्चनीचविचारः।
- नवांशबोधकचक्रम्।
- मेषादिद्वादशराशिषु हद्देशविचारो हद्देशचक्रञ्च।

- ग्रहाणां स्वभवनादिभिन्नस्थलेषु बलकथनम्।
- पञ्चवर्गचक्रम्।
- द्वादशवर्गीयबलकथनम्।
- होरेशचक्रम्।
- द्रेष्काणेशचक्रम्।
- पञ्चमांशेशद्वादशांशेशाविचारश्च।
- द्वादशांशचक्रम्।
- एकादशांशेशचक्रम्।

अन्वितिः ३. ग्रहफलनिर्णयः वर्षेशविचारश्च। **श्रेयोऽङ्कः १**

- ग्रहफलनिर्णयः।
- क्षेत्रभेदेन ग्रहस्य शुभपापत्वकथनम्।
- द्वादशभावानां शुभाशुभफलकथनम्।
- द्वादशवर्गीयचक्रम्।
- लग्नादिद्वादशभावेभ्यः विचारकथनम्।
- बलयुक्तग्रहलक्षणम्।
- वर्षेशनिर्णयार्थं पञ्चाधिकारिणः।
- दृष्टिसाम्ये व्यवस्थाकथनम्।
- मुन्थानयनम्।
- राहोर्मुखपुच्छानां लक्षणम्।

अन्वितिः ४. ग्रहदृष्टियोगसहमसाधनं च। **श्रेयोऽङ्कः १**

- सूर्य-चन्द्र-कुज-बुध-गुरु-शुक्र-शनि-राहुस्वरूपकथनम्।
- प्रत्यक्षस्नेहगुप्तदृष्टिविचारः।
- इष्टदृष्टिकलासाधनम्।
- दृष्टि ध्रुवाङ्काः।
- सूर्यादिग्रहाणां दीप्तांशाः।
- ईसराफतः रद्दादियोगानां सोदाहणलक्षणानि।
- हर्षस्थानानि, पञ्चाशत्सहमनामानि।
- पुण्य-गुरुविद्यायश-मित्र-सामर्थ्य-भ्रातृ-कर्मरोगमन्मथ-कार्यसिद्धिकथनम्।
- शत्रुशौर्योपायदरिद्रगुरुतासहमसाधनकथनम्।
- सहमफलानि।
- निर्बलग्रहलक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पण्डितश्रीगङ्गाधरमिश्रशर्मा, (१९५०), *ताजिकनीलकण्ठी,* वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस।
2. पं. श्रीनिवास झा,(2012), *ताजिकनीलकण्ठी (हिन्दी अनु.),* वाराणसी : चौखम्बा विद्याभवन।

3. आचार्य, नीलकण्ठः, *ताजिकनीलकण्ठी (पं.श्रीसीतारामशर्मकृतागूढार्थप्रकाशिकाख्या),* वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीगणेशदैवज्ञः, पं.सीतारामशास्त्री, (2018) *ताजिकभूषणम्,* मुम्बई : खेमराज-कृष्णदास-प्रकाशनम्।
2. के, एन राव, *ताजिक और वर्षफल,* नई दिल्ली : वाणी प्रकाशन।

काठिन्यस्तरः 600-699 | **श्रेयोऽङ्काः - 4**

प्रधानः पाठ्यक्रमः (Major) 1.4: मुहूर्तविज्ञानम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. कृषिविषयकमुहूर्तानाम् अवगमनम्।
2. विवाह-गृहप्रवेश-उपनयनादिषु मुहूर्तनिर्णयस्य सिद्धान्तानां ज्ञानम्।
3. ग्रह-नक्षत्र-तिथि-करण-योग-वाराणां समन्वयेन शुभाशुभनिर्णयस्य ज्ञानम्।
4. आधुनिके काले मुहूर्तशास्त्रस्य प्रासङ्गिकतायाः प्रतिपादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. पञ्चाङ्गानां समन्वयेन मुहूर्तनिर्णयं कर्तुं समर्थाः भविष्यन्ति।
2. विवाहमेलपकनिर्णये शक्ताः भविष्यन्ति।
3. गृहप्रवेशमुहूर्तनिर्णयं कर्तुं शक्ष्यन्ति।
4. मुहूर्तानां व्यावहारिकोपयोगं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	मुहूर्तविज्ञानम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शुभाशुभमुहूर्तः। **श्रेयोऽङ्कः १**

- शुभकर्मणि त्याज्यविचारः।
- नक्षत्राणां संज्ञा।
- दिवामुहूर्ताः रात्रि मुहूर्ताश्च।
- अनध्ययननिर्णयः।
- राज्याभिषेकः।
- सुरप्रतिष्ठामुहूर्तः।
- वस्त्रधारणमुहूर्तः।
- पञ्चके वर्ज्यकर्म।
- कृषिकर्ममुहूर्तः।
- पशुकर्ममुहूर्तः।
- शपथग्रहणमुहूर्तः।

अन्वितिः २. जातकर्म-उपनयनादिमुहूर्ताः। **श्रेयोऽङ्कः १**

- गर्भाधानमुहूर्तः।
- पुंसवनमुहूर्तः।
- जातकर्ममुहूर्तः।
- नामकरणमुहूर्तः।

- डोलारोहणमुहूर्तः।
- कर्णवेधमुहूर्तः।
- अन्नप्राशनमुहूर्तः।
- चूडाकरणमुहूर्तः।
- उपनयनमुहूर्तः।
- जन्मराशितः ग्रहाणां शुभाशुभत्वम्।
- ताराबलम्।
- ग्रहाणां परस्परवेधस्थानानि।
- राशिभेदेन सङ्क्रान्तिपुण्यकालः।
- अधिमासक्षयमासलक्षणानि।

अन्वितिः ३. विवाहविचारः। श्रेयोऽङ्कः १

- वरकन्ययोः गुणमेलापकम्।
- विवाहसमयचिन्तनम्।
- वेधविचारः।
- लत्तादोषः।
- कर्तरिदोषः परिहारश्च।
- गण्डान्तदोष-यामार्धदोष-विषघटीविचारश्च।
- पञ्चकदोषः परिहारश्च।
- लग्ननवांशशुद्धिविचारः।
- जामित्रदोषः परिहारश्च।
- अग्न्याधानमुहूर्तः।

अन्वितिः ४. गृहवास्तुमुहूर्तः। श्रेयोऽङ्कः १

- ग्रामशुभाशुभविचारः काकिणी विचारः च।
- भूमिप्लवविचारः।
- शल्यज्ञानम्।
- शुभाशुभभूमिविचारः।
- दिक्-साधनम्।
- गृहारम्भमुहूर्तः।
- वृषवास्तुविचारः।
- गृहद्वारम् , आयभेदः।
- शङ्कुविचारः।
- शिलान्यासः।
- गृहप्रवेशविचारः।
- गृहप्रवेशे लग्नशुद्धिः।
- वामरविविचारः।
- यात्राकालज्ञानम्।
- दिग्द्वारनक्षत्रम्।
- यात्रालग्ने शुभयोगः।
- सम्मुखबुधशुक्रपरिहारः।
- यात्रायां त्याज्यम्।
- यात्रायां शुभाशुभशकुनविचारः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. दैवज्ञनारायणः, (1986), *मुहूर्तमार्तण्डः*, काशी : सीताराम मुद्रणालय।
2. केदारदत्त जोशी, (2015), *मुहूर्तमार्तण्डः*, वाराणसी : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. केदारदत्त जोशी, (1979), *मुहूर्तचिन्तामणि*, वाराणसी : मोतीलाल बनारसीदास।
2. मुरलीधर चतुर्वेदी, (2011), *मुहूर्तगणपति*, वाराणसी : मोतीलाल बनारसीदास।
3. पं. श्री कमलकान्त ठाकुर, (2019), मुहूर्तचिन्तामणि, ('पीयूषधारा' "मङ्गला" संस्कृतहिन्दीव्याख्याद्वयोपेतम्)
4. श्रीविन्ध्येश्वरी प्रसाद द्विवेदी, (2020), *श्रीमद्रामदैवज्ञविरचितः मुहूर्तचिन्तामणिः, ('पीयूषधारा' 'मणिप्रदीप', संस्कृतहिन्दीव्याख्याद्वयोपेतम्),* वाराणसी-चौखम्बा-सुरभारती-प्रकाशनम्।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: दशान्तर्दशाविचारः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विंशोत्तरीदशायाः गणनापद्धतेः ज्ञानम्।
2. कालचक्रदशागणनाप्रकारस्य ज्ञानम्।
3. दशाफलकथने दक्षतासम्पादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विंशोत्तरादिदशागणनापद्धतेः प्रामाणिकं स्वरूपं वक्ष्यन्ति।
2. फलादेशकथने दशायाः महत्वं प्रतिपादयिष्यन्ति।
3. अन्तर्दशायाः फलकथने दक्षाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	दशान्तर्दशाविचारः	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. विविधदशासाधनविचारः। **श्रेयोऽङ्कः १**

- विंशोत्तरी-षोडशोत्तरी-पाचक-पिण्डादिदशानां सोदाहरणविवेचनम्।

अन्वितिः २. विंशोत्तरीदशाफलविचारः। **श्रेयोऽङ्कः १**

- विंशोत्तरीपंचविधसंज्ञाः।
- विंशोत्तरीमहादशावर्षनक्षत्रचक्रम्।
- भुक्तभोग्यानयनम्।
- सूर्य-चन्द्र-मंगल-राहु-गुरु-शनि-बुध-केतु-शुक्रादिदशाफलम्।
- द्वादशभावाधीशदशाफलम्।
- अन्तर्दशाप्रकरणम्।
- अन्तर्दशाशुभाशुभविचारः।
- द्वादशभावाधीशशुभाशुभविचारः।

अन्वितिः ३. रव्यादिग्रहाणां मध्ये अन्तर्दशाविचारः। **श्रेयोऽङ्कः १**

- रविमहादशायाम् अन्यग्रहान्तर्दशाफलम्।
- चन्द्रमहादशायाम् अन्यग्रहान्तर्दशाफलम्।
- कुजमहादशायाम् अन्यग्रहान्तर्दशाफलम्।
- राहुमहादशायाम् अन्यग्रहान्तर्दशाफलम्।
- गुरुमहादशायाम् अन्यग्रहान्तर्दशाफलम्।
- शनिमहादशयाम् अन्यग्रहान्तर्दशाफलम्।
- बुधमहादशायाम् अन्यग्रहान्तर्दशाफलम्।
- केतुमहादशायाम् अन्यग्रहान्तर्दशाफलम्।

अन्वितिः ४. विदशादिफलविचारः। **श्रेयोऽङ्कः १**

- उपदशानयनम्।
- विंशोत्तर्युपदशाचक्राणि।
- सूर्यादिग्रहाणां विदशाफलम्।
- सूक्ष्मदशाकरणम्।
- सूर्यादिग्रहाणां सूक्ष्मदशाफलम्।
- प्राणदशानयनम्।
- सूर्यादिग्रहाणां प्राणदशाफलम्।
- कालचक्रदशानयनम्।
- सव्यापसव्यतः मेषादिवृश्चिकाद्यंशाः।
- कालचक्रसव्यापसव्यमार्गदशाचक्रमन्तरचक्राणि च।
- कालचक्रांशफलम्।
- उदयफलम्।
- देहजीवफलम्।
- गतिभेदाः फलानि च।
- चरदशाफलम्।
- दशावाहनफलम्।
- सुदर्शनचक्रफलम्।
- राहुदृष्टिकथनम्।
- ग्रहाणामुदयवर्षाणि।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पं. पद्मनाभशर्मा, (2007), *बृहत्पाराशरहोराशास्त्रम् (व्याख्यासहितम्),* वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्।
2. पं, देवचन्द्र झा , *बृहत्पाराशरहोराशास्त्रम्,* वाराणसी : चौखंबा संस्कृत संस्थान।

सहायकाः ग्रन्थाः (Additional Readings)

1. वैद्यनाथः, (1984), *जातक-पारिजातः,* वाराणसी : चौखम्भा-संस्कृत-संस्थानप्रकाशनम्।
2. वराहमिहिरः, (2007), *लघुजातकम् (भट्टोत्पलटीकासहिता),* वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्।
3. वराहमिहिरः, (2007), *बृहज्जातकम् (भट्टोत्पलटीकासहिता),* वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्।
4. श्रीमत्कल्याणवर्म, (2008), *सारावली,* वाराणसी : मोतीलालबनारसीदास।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: कालमाधवः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ऋत्वयनवर्षादिनिर्णयज्ञानम्
2. तिथिनिर्णयस्य ज्ञानम्।
3. व्रतसङ्क्रान्तिग्रहणादीनां कालनिर्णयतत्त्वविवेचनम्।
4. भारतीयज्योतिषे कालमाधवग्रन्थस्य प्रासङ्गिकतायाः प्रतिपादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. कालमाधवानुसारेण तिथिनिर्णयविचारं ज्ञात्वा प्रयोक्तुं समर्थाः भविष्यन्ति।
2. कालगणनायाः पद्धतिं शास्त्रीयरीत्या सप्रमाणं प्रयोक्तुं शक्ष्यन्ति।
3. व्रतोपवासादिनिर्णये कुशलाः भविष्यन्ति।
4. प्रतिपत्तिथेः विचारं द्वितीयादितिथीनां च गणनापद्धतिं निरूपयिष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	कालमाधवः	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वत्सरविचारः। **श्रेयोऽङ्कः १**

- अयननिर्णयः।
- ऋतुनिर्णयः।
- शुद्धमासनिर्णयः।
- मलमासनिर्णयः।
- वर्ज्यावर्ज्यविवेकः।
- पक्षनिर्णयः।

अन्वितिः २. प्रतिपदादितिथिनिर्णयः। **श्रेयोऽङ्कः १**

- प्रतिपत्तिथेः निर्णयः।
- चन्द्रसूर्यसंयोगविचारः।
- पर्वप्रारम्भविचारः।
- प्रथमा-निर्णयः।
- द्वितीयानिर्णयः।
- तृतीयानिर्णयः।
- चतुर्थीनिर्णयः।
- पञ्चमीनिर्णयः।
- षष्ठीनिर्णयः।

अन्वितिः ३. सप्तम्यादितिथिनिर्णयः। **श्रेयोऽङ्कः १**

- सप्तमीनिर्णयः।
- अष्टमीनिर्णयः।
- नवमीनिर्णयः।
- दशमीनिर्णयः।
- एकादशीनिर्णयः - उपवासतिथिनिरूपणं व्रतानुष्ठानक्रमश्च।
- द्वादशीनिर्णयः।
- त्रयोदशीनिर्णयः।
- चतुर्दशीनिर्णयः।
- पञ्चदशीनिर्णयः।

अन्वितिः ४. नक्षत्रादिविचारः। **श्रेयोऽङ्कः १**

- नक्षत्रनिर्णयः।
- योगनिर्णयः।
- करणनिर्णयः।
- सङ्क्रान्तिनिर्णयः।
- ग्रहणनिर्णयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीचन्द्रकान्ततर्कालङ्कारकृत, (1973), *कालमाधवः(संक्षिप्तटिकासमेतः),* लक्ष्मीवेङ्कटेश्वर मुद्रणालयः।
2. ब्रजकिशोर स्वाई, *कालमाधवः*, वाराणसी : चौखंबा संस्कृत भवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्री. मिहिरचन्द्रः, (2020), *काशिनाथ उपाध्यायकृत धर्मसिन्धुः (हिन्दी अनु.)*, मुम्बई : खेमराज श्रीकृष्णदास प्रकाशन।
2. रामचन्द्र झा, *तिथि निर्णयः,* वाराणसी : चौखंबा विद्याभवन।
3. विश्वनाथ शास्त्री, *तिथि निर्णयः,* वाराणसी : चौखंबा संस्कृत सिरीस।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: ताजिकवर्षतन्त्रम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ताजिकवर्षतन्त्रस्य सिद्धान्तानां सम्यगवबोधनम्।
2. मुन्था-सहम-दशेत्यादिताजिकपद्धतीनां विश्लेषणम्।
3. ताजिकददृष्ट्या प्रश्नस्वप्नादिविचाराणाम् अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मुन्था-प्रश्न-दशेत्यादीनां विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
2. ताजिकवर्षतन्त्रस्य विश्लेषणं कर्तुं शक्ष्यन्ति।
3. वर्षफलनिर्णयस्य सिद्धान्तानाम् निरूपणे समर्थाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	ताजिकवर्षतन्त्रम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मुन्थहाफलविचारः। **श्रेयोऽङ्कः १**

- सूर्यादिग्रहाणां वर्षेशफलम्।
- मध्यमबल-हीनबल-पूर्णबलसूर्यादिग्रहाणां वर्षेशफलकथनम्।
- मुन्थहानयनकथनं फलविचारश्च।
- मुन्थहाभावफलम्।
- तन्वादिद्वादशभावस्थितमुन्थहाफलम्।
- स्थानविशेषमुन्थहाफलम् सूर्यादिग्रहयुतदृष्टतद्राशिस्थमुन्थहाफलम्।

अन्वितिः २. तन्वादिभावविचारः दशाफलविचारश्च। **श्रेयोऽङ्कः १**

- लग्नेशाद्यरिष्टकथनम्।
- चन्द्रारिष्टं सापवादकथनम् च।
- मुन्थहाकृतारिष्टकथनम्।
- राजयोगभङ्गकथनम्।
- तन्वादिभावविचारः।
- वर्षलग्नफलविचारः।

- दशाक्रमविचारः।
- लग्नदशाफलम्।
- पूर्ण-मध्य-स्वल्पबलसूर्यादिग्रहाणां दशाफलविचारः।

अन्वितिः ३. अवस्थाफलविचारः भोजनचिन्ता च। श्रेयोऽङ्कः १

- अन्तर्दशासाधनम्।
- लग्नादिभावस्थसकलग्रहफलम्।
- मासप्रवेशवेलासाधनं तत्फलञ्च।
- मासेशसाधनं तत्फलञ्च।
- लग्ननवांशोत्पन्नभावस्य शुभाशुभफलविचारः।
- दिनेशफलं दिनस्वामिनिर्णयश्च।
- कर्त्तरियोगः।
- चन्द्रकृतानिष्टविचारः।
- चन्द्रावस्थावशेन फलविचारः।
- अवस्थाफलविचारः।
- मृगयाविचारः।
- भोजनचिन्तनविचारः।
- ग्रहभेदेन भोजनपदार्थफलकथनं स्वप्नचिन्ता च।

अन्वितिः ४. ग्रहदृष्टि-योग-सहमसाधनञ्च। श्रेयोऽङ्कः १

- प्रश्नविचारस्य प्रयोजनम्।
- प्रष्टुः परिचयकथनम्।
- ग्रहाणामवस्थाफलानि।
- रव्यादिग्रहस्वरूपकथनम्।
- लग्नादिद्वादशभावेभ्यः विचारणीयम्।
- सकलभावविषयकवृद्धिहानिः।
- कार्यसिद्धियोगः।
- अनिष्टयोगः।
- कार्यसिद्धिप्रश्नविचारः।
- लग्नादिद्वादशस्थानपृच्छानिरूपणम्।
- रोगिणः शुभाशुभविचारः।
- स्वप्नविचारः।
- मुद्दादशा त्रिपताकीचक्रञ्च।
- विदेशकुण्डलीनिर्माणप्रकरणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पण्डितश्रीगङ्गाधरमिश्रशर्मा, (१९५०), *ताजिकनीलकण्ठी*, वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस। (वर्षतन्त्रादन्तं यावत्)
2. पं. श्रीनिवास झा, (2012), *ताजिकनीलकण्ठी (हिन्दी अनु.)*, वाराणसी : चौखम्बा विद्याभवन।
3. आचार्य, नीलकण्ठः, *ताजिकनीलकण्ठी (पं. श्रीसीतारामशर्मकृतागूढार्थप्रकाशिकाख्या)*, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीगणेशदैवज्ञः, पं.सीतारामशास्त्री, (2018), *ताजिकभूषणम्*, मुम्बई : खेमराज-कृष्णदास-प्रकाशनम्।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: सामुद्रिकरहस्यम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मानवाङ्गलक्षणानां विवेचनम्।
2. होराशास्त्रसामुद्रिकशास्त्रयोः समन्वयस्य ज्ञानम्।
3. हस्तचिह्नानि मुखलक्षणानि च दृष्ट्वा फलादेशज्ञानम्।
4. हस्तरेखाणामाधारेण विविधयोगनिर्णयस्य ज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आरोग्यरेखालक्षणानाम् आधारेण स्वस्थ्यविषये मार्गदर्शनं कर्तुं समर्थाः भविष्यन्ति।
2. शरीरलक्षणानां ग्रहयोगानां च समन्वयपुरस्सरं फलादेशे समर्थाः भविष्यन्ति।
3. हस्तरेखालक्षण-मुखलक्षण-पादचिह्नलक्षणादिद्वारा फलकथने प्राविण्यं प्राप्स्यन्ति।
4. सामुद्रिकलक्षणानाम् आधारेण योगानां निर्णये प्रवीणाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	सामुद्रिकरहस्यम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मानवनखशिखादिवर्णनम्। **श्रेयोऽङ्कः १**

- केशवर्णनम्।
- ललाटवर्णनम्।
- भ्रूवर्णनम्।
- नेत्रवर्णनम्।
- नासिकावर्णनम्।
- मसूरिका।
- आननवर्णनम्।
- ओष्ठवर्णनम्।
- दन्तवर्णनम्।
- स्वरवर्णनम्।
- ग्रीवालक्षणम्।
- स्कन्ध-हृदयवर्णनम्।
- बाहुवर्णनम्।
- हस्ताङ्गुलिलक्षणम्।
- नखवर्णनम्।
- अङ्गुष्ठाङ्गुलिलक्षणम्।
- कररेखावर्णनम्।
- आयु-रेखालक्षणम्।

- नाभिलक्षणम्।
- पृष्ठलक्षणम्।
- कटिलक्षणम्।
- ऊरूवर्णनम्।
- पदलक्षणम्।

अन्वितिः २. प्रमदालक्षणादितुर्यपुरुषस्त्रीणाञ्च लक्षणानि। **श्रेयोऽङ्कः १**

- नखशिखादिवर्णनम्।
- कराङ्गुष्ठरेखादिलक्षणम्।
- शरीरमानम्।
- तिलवर्णनम्।
- शशकपुरुषस्य लक्षणानि।
- पद्मिनी-चित्रिणी-हस्तिनी-शङ्खिन्यादिस्त्रीणां लक्षणानि फलानि च।
- मेलापकविचारः।
- बालकानां शुभाऽशुभविचारः।
- बालारिष्टविचारः।

